अतिथिपरिचर्य्याप्रकारस्य परिशिष्टखण्डे वक्ष्यते । स्वार्थे ष्यञ् । २अतिथौ हेम० ।

**आतिदेशिक** त्रि० अतिदेशादागतः ठक् । अतिदेशप्राप्ते । यथा प्रकृतिधर्मस्य विकृतौ आतिदेशिकत्वम् । "आतिदेशिकमनित्यम्" इति व्या० परिभाषा ।

**आतियात्रिक** त्रि० अतियात्रायां नियुक्तः ठक् । आतिवाहिकदेवे विवरणमातिवाहिकशब्दे ।

**आतिरेक्य** न० अरिच्यते कर्म्मणि घञ् तस्य भावः ष्यञ् । अतिरेके वृद्धौ स्वपरिमाणातिरेके ।

**आतिवाहिक** त्रि० अतिवाहे इहलोकात् परलोकप्रापणे नियुक्तः ठक् । एतल्लोकात् परलोकप्रापणे ईश्वरनियुक्ते अर्चिराद्यभिमानिदेवगणे धूमाद्यभिमानिदेवगणे च । "आतिवाहिकास्तल्लिङ्गात्" शा०सू० । अतिवाहने नियुक्ताश्च द्विविधाः दक्षिणमार्गे उत्तरमार्गे च तत्र कर्म्मिणां दक्षिणमार्गेण ज्ञानिनाञ्चोत्तरमार्गेण गमनात् तत्र नयनाय ईश्वरनियुक्ता धूमादयः अर्च्चिरादयश्च ते च छा० उ० दर्शिता यथा ।

"अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" । "इष्टापूर्त्ते इष्टमग्निहोत्रादि वैदिकं कर्म्म, पूर्त्तं वापीकूपतडागारामादिकरणम् । दत्तं च बहिर्वेदि, यथाशक्त्यर्हेभ्यो द्रव्यसम्भागो दत्तम् । इत्येवंविधं परिचरणं परित्राणाद्युपासते । इतिशब्दस्य प्रकारदर्शनार्थत्वात् । ते दर्शनवर्ज्जितत्वाद्धूमं धूमाभिमानिनीं देवतामाभिमुख्येन सम्भवन्ति प्रतिपद्यन्ते । तयाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां, रात्रेरपरपक्षदेवताम्, एवमेव कृष्णपक्षाभिमानिनीमपरपक्षात् यान् षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान् मासान् दक्षिणायनान् षण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः । सङ्घचारिण्यो हि षण्मासदेवता इति मासानिति बहुवचनप्रयोगस्तासु । नैते कर्म्मिणः प्रकृताः संवत्सरं संवत्सराभिमानिनीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि संवत्सरस्य प्रसङ्गोह्येकस्यावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्गप्रवृत्तानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापन्नेत्यतस्तत्प्राप्तिः प्रतिषिध्यते नैते संवत्सरमभिप्राप्नुवन्तीति । मासेभ्यः पितृलोकं, पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यस्तैः प्राप्यः चन्द्रमाः य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्नं देवता इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्म्मिणो देवैर्भक्ष्यन्ते नन्वनर्थायेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन् नैष दोषः । अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते । किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते स्त्रीपशुभृत्यादिवत् । दृष्टश्चान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं राज्ञामित्यादि । न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्म्मिणो देवतानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ते । शरीरञ्च तेषां तेषूपभोगयोग्यं चन्द्रमण्डले आप्यमारभ्यते । तदुक्तं "पुरस्ताच्छ्रद्धा शब्दा आपो द्युलोकाग्नौ हुताः सोमो राजा सम्भवन्तीति" । ता आपः कर्म्मसमवायिन्य इतरैश्च भूतैरनुगताः द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति । इति" भा० पितृयानःपन्था दर्शितः देवयानस्तु ।

"अथ यदु चैवास्मिञ्छव्यं कुर्व्वन्ति यदि च नार्च्चिषमेवाभिसम्भवन्त्यर्च्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते नावर्त्तन्ते" "अथेदानीं यथोक्तब्रह्मविदो गतिरुच्यते यद्यदि उ च एवास्मादेवंविदि शव्यं शवकर्म्म ऋते कुर्व्वन्ति यदि च न कुर्व्वन्ति ऋत्विजः, सर्व्वथाप्येवंवित्तेन शवकर्म्मणा अकृतेनापि न प्रतिबद्धो ब्रह्म प्राप्नोति न च कृतेन शवकर्म्मणाऽस्य कश्चनाभ्यधिको लोकः "न कर्म्मणा वर्द्धते नो कनीयानिति" श्रुत्यन्तरात् । शवकर्म्मण्यनादरं दर्शयन् विद्यां स्तौति, न पुनः शवकर्म्म एवंविदो न कर्त्तव्यमिति । अक्रियमाणे हि शवकर्म्मणि कर्म्मणां फलारम्भे प्रतिबन्धः कश्चिदनुमीयते अन्यत्र । यत इह विद्याफलारम्भकाले शवकर्म्म स्याद्वा न वेति विद्यावतोऽप्रतिबन्धेन फलारम्भं दर्शयति । ये सुखाकाशमक्षिस्थं संयद्वामनीत्वेनोपासते प्राणसहितामग्निविद्यां, तेषामन्यत्कर्म्म भवतु मा वा भूत्